Total Pages – 05    RNLKWC/P.G./Sanskrit/SAN-403/SEM-IV/24

## SANSKRIT (P.G.)

## (CBCS)

## M.A. Fourth Semester End Examination-2024

## (Regular & Supplementary Paper)

## PAPER - SAN-403

***Full Marks : 40*** ***Time : 2 hours***

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

## PAPER - SAN-403B

**[संस्कृतभाषया देवनागरीलिप्या च सर्वे प्रश्नाः समाधेयाः]**

**A. यथाकामं प्रश्नचतुष्टयं समाधेयम्।** 2×4=8

१. लोके यत् कारणं कार्यञ्च काव्ये तत्किम्?

२. विप्रलम्भशृङ्गारस्य कति भेदाः? के च ते?

३. असंलक्ष्यक्रमव्यङ्ग्यस्य मुख्याः कति भेदाः? के च ते?

४. 'अयं स रशनोत्कर्षी' इत्यत्र कः अङ्गिरसः कश्च अङ्गरसः?

५. शब्दश्लेषस्य लक्षणं किम्? अस्य भेदाश्च कतिधा?

(Turn Over)

६. समस्तवस्तुविषयं रूपकं किम्?

**B. सलक्षणं सोदाहरणं द्वयोः व्याख्या कार्या।** 4×2=8

१. यमकम्।

२. भ्रान्तिमान्

३. निदर्शना

**C. यथेच्छं द्वयोः व्याख्या कार्या।** 4×2=8

१. अविवक्षितवाच्यध्वनिः

२. भयानकरसः

३. रसाभासः

**D. यथानिर्देशं समाधेयम्।** 8×2=16

क) रससूत्रमुल्लिख्य श्रीशङ्कुकमतम् उपस्थापयत।

अथवा, गुणीभूतव्यङ्ग्यस्य लक्षणं भेदान् च उल्लिख्य सोदाहरणं द्वयोः व्याख्या कार्या।

ख) काव्यप्रकाशनमुसृत्य सलक्षणं सोदाहरणम् अनुप्रासस्वरूपं वर्णयत।

अथवा, सोदाहरणं सभेदम् उपमास्वरूपं स्पष्टीकुरुत।





## PAPER - SAN-403C

**[सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः]**

**A. यथाकामं प्रश्नचतुष्टयं समाधत्त।** 2×4=8

1. न्यायभाष्यस्य रचयिता कः? न्यायमते अपवर्गः कः?

2. न्यायशास्त्रस्य कतिधा प्रवृत्तिः? काश्च ताः?

3. महर्षिगौतमस्य अपरनाम किम्? न्यायदर्शनस्य प्रथमसूत्रं किम्?

4. प्रशस्तपादभाष्यं किं दर्शनम् अवलम्ब्य केन विरचितम्?

5. किं विशेषलक्षणम्? विशेषः किमर्थं स्वीकार्यः?

6. स्यन्दनादीनां कथं न पृथक् कर्मत्वम्?

**B. यथानिर्देशं समाधत्त।** 4×2=8

**क) यथेच्छं द्वौ उत्तरत।**

(i) व्याख्या कार्या – अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टञ्च॥

(ii) टीकां लिखत – शब्दप्रमाणम्।

(iii) व्याख्या कार्या –

इच्छा-द्वेष-प्रयत्न-सुख-दु:ख-ज्ञानान्यात्मनो लिङ्गम्॥

ख) यथेच्छं द्वौ उत्तरत। 4×2=8

(i) टीकां लिखत – सामान्यम्।

(ii) तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेव – व्याख्यायताम्।

(iii) टीकां लिखत - पृथिवी।

C. यथानिर्देशं उत्तरत। 8×2=16

क) न्यायमते कतिविधं प्रमाणम्? तत्र प्रत्यक्षलक्षणं किम्? सूत्रकारेण प्रत्यक्षस्य यत् लक्षणमुक्तं तत् प्रत्यक्ष-प्रमाणस्य उत प्रत्यक्षप्रमाया: लक्षणम्? प्रतिपद-व्यावृत्तिपुर:सरं प्रत्यक्षलक्षणं विचार्यताम्।

अथवा

संशयादीनां पदार्थानां यथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भावेऽपि कथं तेषां पृथगुल्लेख: विशद्यताम्?





ख) 'द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं नि:श्रयसहेतु:' इति पङ्क्ति: व्याख्यायताम्।

अथवा

समवायो व्याख्येय:। तत्र अयुतसिद्धपदस्य अर्थपरिष्कार: कार्य:।